## भिक्षादिभ्योऽण्। (३८/१२४४)

भिक्षा इत्येवमादिभ्यः शब्देभ्योऽण् प्रत्ययो भवति तस्य समूहः [1]इत्येतस्मिन् विषये। अण्ग्रहणं [2]बाधकबाधनार्थम्। भिक्षाणां समूहः भैक्षम्। गार्भिणम्। युवतिशब्दोऽत्र पठ्यते, तस्य ग्रहणसामर्थ्याद् पुंवद्भावो[3] न भवति '[1]भस्याढे तद्धिते' (६.३.३५/८३६ वा.) इति। युवतीनां समूहो [4]यौवतम्।

भिक्षा। गर्भिणी। क्षेत्र। करीष। अङ्गार। [5]चर्मिन्। धर्मिन्। सहस्र। युवति। पदाति। पद्धति। [6]अथर्वन्। दक्षिणा। [7]भूत[8]॥

## गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्याजाद् वुञ्। (३९/१२४६)

गोत्रादिभ्यो वुञ् प्रत्ययो भवति तस्य [9]समूहः इत्येतस्मिन् विषये। अपत्याधिकारादन्यत्र लौकिकं गोत्रं गृह्यतेऽपत्यमात्रं, न तु पौत्रप्रभृत्येव[10]। औपगवानां [11]समूहः औपगवकम्। कापटवकम् (म. भा. २.२७९)। उक्षन्–औक्षकम्। उष्ट्र–औष्ट्रकम्। उरभ्र–औरभ्रकम्। राजन्–राजकम्। राजन्य–[12]राजन्यकम्। राजपुत्र–राजपुत्रकम्। वत्स–[13]वात्सकम्। मनुष्य–मानुष्यकम्। अज–आजकम्। 'प्रकृत्याऽके राजन्यमनुष्ययुवानः' (७. १. १/१२४७ वा.) इति यलोपो न भवति, 'आपत्यस्य च तद्धितेऽनाति' (६. ४. १५१/१०८२) इति।

[४१६] वृद्धाच्चेति वक्तव्यम्। (म. भा. २.२७८)

[14]वृद्धानां समूहो वार्धकम् (म. भा. २. २७८)॥

## केदाराद् यञ् च। (४०/१२४८)

केदारशब्दाद् यञ् प्रत्ययो भवति, चकाराद् वुञ् च, तस्य समूहः इत्येतस्मिन् [15]विषये। अचित्तलक्षणस्य ठकः (४. २. ४७/१२५६) अपवादः। केदाराणां समूहः कैदार्यम्, [16]कैदारकम्।

[४१७] गणिकायाश्च यञ् वक्तव्यः। (म. भा. २. २७९)

गणिकानां समूहः गाणिक्यम्॥

## ठञ् कवचिनश्च। (४१/१२४०)

कवचिन् शब्दात् ठञ् प्रत्ययो भवति तस्य समूहः इत्येतस्मिन् [17]विषये। कवचिनां समूहः कावचिकम्। चकारः केदारात् [18]इत्यस्यानुकर्षणार्थः। [19]केदाराणां समूहः कैदारिकम्॥

---

1. इत्यस्मिन्नर्थे ग. फ. 2. बाधकम् क. 3. अत्र इत्यधिकम् फ. 4. यौवतम् नास्ति क. 5. चर्मन् धर्मन् ब. क, वर्मन् इत्यधिकम् ब. 6. अर्वन् ड. 7. भूत नास्ति ब. क. 8. विषय, श्रोत्र। वृक्षादिभ्यः खण्डः। वृक्षखण्डः। तरुखण्डः। वृक्ष तरु पादप इत्यधिकम् ड. क. 9. समूहः नास्ति ग. 10. अपत्यम् इत्यधिकम् फ. 11. समूहः नास्ति फ. 12. राजन्यकम् नास्ति फ. 13. वत्सकम् ब. क. फ. 14. वृद्धानां समूहः नास्ति फ. 15. अर्थे फ. 16. कैदारम् फ. 17. अर्थे क. 18. अस्य नास्ति फ. 19. केदाराणां समूहः नास्ति फ.